श्रीमते लक्ष्मीनृसिंहपरब्रह्मणे नमः ॥
श्रीमते श्रीवण्शठकोपश्रीवेदान्तदेशिकयतीन्द्रमहादेशिकाय नमः ॥
श्रीमते श्रीलक्ष्मीनृसिंहदिव्यपादुकासेवक श्रीवण्शठकोपश्रीनारायण-यतीन्द्रमहादेशिकाय नमः ॥
श्रीमते श्रीवण्शठकोपश्रीरङ्गनाथयतीन्द्रमहादेशिकाय नमः ॥

# श्रुतप्रदीपिका - अभिनन्दनम्

'अध्यासीनतुरङ्गवक्त्रविलसज्जिह्वाग्रसिंहासनादाचार्यादिह देवतां समधिकामन्यां न मन्यामहे । यस्यासौ भजते कदाचिदजहद्भूमा स्वयं भूमिकां मग्नानां भविनां भवार्णवसमुत्ताराय नारायणः ॥' इति, 'श्रीमान्नारायणो देवः कृत्वा मर्त्यमयीं तनुम् । मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना' इति, 'गुरुरसि गतिश्चासि जगताम्' इति च प्रमाणैः भगवतः संसारिचेतनोद्दिद्धीर्षया आचार्यरूपेण अवतीर्य हितप्रवर्तनं सुविदितमेव । तथा श्रीमतः नृसिंहस्य, 'त्वं गतिस्त्वं मतिर्मह्यं पिता माता गुरुः सखा । सुहृदश्चात्मरूपस्त्वं त्वां विना नास्ति मे गतिः' इति, श्रीनृसिंहपुराणस्थ-मार्कण्डेयोक्त-तत्सहस्रनामस्तोत्रादवगतं सर्वविधबन्धुत्वम् । स च श्रीनृसिंहः अनाद्यविच्छिन्नाचार्यपरम्परया, 'विष्णुश्रीपृतनापतीन् शठरिपुश्रीनाथपद्मेक्षणान् रामं यामुनपूर्णमिश्रयतिराड्गोविन्दभट्टारकान् । वेदान्त्याख्यमुनिं कलिप्रमथनं श्रीकृष्णपादाभिधं श्रीरङ्गेश्वरकेशवार्यकमलावासान् भजे केशवम् ॥ केशवार्यकृपापात्रम्' इत्यादिक्रमेण श्रीमदहोबिलमठास्थाने, 'यत्कटाक्षेण सर्वेऽपि यत्स्थानागतयोगिनः । श्रीनृसिंहदयापूर्णाः तन्मुनेः मङ्गळं सदा ॥' इति प्रतिपादितवैभवैः आचार्यवर्यैः अद्यापि लोकहितं प्रवर्तयति । ईदृशमहिममहितेषु आचार्यवर्येष्वन्यतमैः तदास्थाने द्विचत्वारिंशपट्टे मूर्धाभिषिक्तैः विश्वविख्यातवैदुष्यैः श्रीलक्ष्मीनृसिंहदिव्यपादुकासेवक-श्रीवण्शठकोपश्रीश्रीरङ्गशठकोपयतीन्द्रमहादेशिकैः सत्यसङ्कल्पैः अन्यादृशं लोकोत्तरं कार्यत्रयं 'शुभेन मनसा ध्यातम्' इतिवत् आरचितम् । तत्र च 'श्रीनृसिंहप्रिया' नाम्नी सम्प्रदायप्रबोधिनी मासिकी पत्रिका, 'श्रीमन्मालोलविद्वत्सभा' इति प्रथिता गरीयसी विदुषां 'सन्तोषार्थं विमृशति मुहुः सद्भिरध्यात्मविद्यां नित्यं ब्रूते निशमयति च स्वादु सुव्याहृतानि' इत्युक्त-परमैकान्ति-प्रपन्नोत्तरकृत्यसाधिका ब्रह्मविचारगोचरा, तथा चैतयोर्द्वयोः पोषणाय सदाचारयुक्तसम्प्रदायक्रमेण शास्त्रविदुषाम् अध्ययनाध्यापनसौकर्यकल्पिका कल्पलतेव काचित् कलाशाला श्रीमतां भगवद्भाष्यकाराणां मन्त्रोपदेशदिव्यक्षेत्रभूते करुणाकरस्य भगवतो नित्यसान्निध्ययुक्ते श्रीमति मधुरान्तके प्रशान्तपर्यावरणयुक्ते वैदिकानुष्ठानाय अत्यन्तमुपयुक्ते स्थाने निर्मिता मालोलकृपापोषिता 'वेदप्रबन्धशास्त्रपाठशाला' च अन्तर्भवन्ति । आचार्यैरेतैः स्वस्य पूर्वाश्रमे ज्ञानपिपासुभिः आसेतुहिमाचलं तत्रतत्रस्थितानां महतां सकाशात् प्रणिपातपरिप्रश्नसेवादिना समधिगतसर्वार्थैः उत्तरकालभाविछात्राणां तादृशक्लेशं विना एकत्रैव सर्वज्ञानस्रोतः-समावेशकल्पनाय स्थापिता कलाशाला एषा पञ्चसप्ततिसंवत्सरेषु त्रिशताधिकपण्डितानां समुन्नतज्ञानवितरणेन साफल्यं भजते । ईदृशप्रभावयुक्तायाः कलाशालायाः आधुनिकसमये विदुषाम् अधिकाधिकसंख्यया प्रशिक्षणं तैः एतत्कालीनयूनां विशिष्य साम्प्रदायिकज्ञानप्राप्त्यै मार्गदर्शनं च अत्यन्तमावश्यकमित्यत्र कस्यापि विप्रतिपत्तिः न स्यात् ।

प्रकृते अस्मद्दर्शनस्थापकानां भगवद्भाष्यकाराणाम् अवतारसहस्राब्दीशुभावसरे अस्याः कलाशालायाः प्रसिद्धाध्यापकेष्वन्यतमैः पूर्ववयस्कैः श्रीमुकुन्दाचार्यैः एतच्छुभावसरस्मारकत्वेन लोकोपकाराय सम्प्रदायग्रन्थेषु अध्ययनाध्यापनरुचिप्रवर्धनाय च शारीरकमीमांसाभाष्यस्य श्रीभाष्यस्य विवरणभूतं श्रीसुदर्शनसूरिप्रणीतम् अनतिप्रसिद्धं प्रचारविधुरं च श्रुतप्रदीपिकाख्यं ग्रन्थरत्नं, मुद्रितपूर्वमपि सम्पूर्णमूलपाठरहितत्वेन पठितॄणां क्लेशावहं, स्वस्य श्लाघ्यप्रयत्नेन सम्पूर्णश्रीभाष्यमूलपाठेन साकं प्रथमभागतया चतुस्सूत्रीपर्यन्तं सम्मुद्यते इति महदिदं प्रमोदस्थानम् ॥

प्रशंसार्हश्चायं प्रयत्नः । अचिरादेव सम्पूर्णस्याप्यस्य ग्रन्थरत्नस्य अवशिष्टभागमुद्रणपूरणेन फलेग्रहिः स्यादिति च भगवन्तं मालोलं प्रार्थयामहे ।

अयं च **डॉ. सौ. श्री. मुकुन्दमहोदयः**, ग्रन्थमिमं परिष्कृत्य अहोबिलमठस्य प्रकाशनसरणौ समर्पयतीति सः अभिनन्दनार्हः । श्रीभाष्यसदस्सु चायं सश्रद्धं भागम् ऊढ्वा दुरूहविषयान् प्रतिपाद्य सर्वसम्प्रदायविदुषां प्रशस्तिपात्रमिति च विदितमेव । **श्रीमदहोबिलमठीय-आदर्श-संस्कृत-महाविद्यालये** बहूनां छात्राणां सम्यक्

अध्यापनमपि करोति । विद्वांश्चायं श्रीमालोलस्य श्रीमदहोबिलमठास्थाने षड्चत्वारिंशे पट्टे मूर्धाभिषिक्तानां आचार्याग्रेसराणां च निरवग्रहानुग्रहेण स्वस्य सुपरिश्रमेण समेधितमतिः पटिष्ठप्रज्ञया कार्यशेषनिर्वर्तनक्षमः अन्यानेकग्रन्थविषयेष्वपि ईदृशप्रक्रमेण ख्यातिं लभतामिति च आशासे। यान्त्रिकपद्धतौ च तत्रतत्र ज्ञातव्यबह्वंशवैदग्ध्यं प्राप्य कलाशालाछात्राणामपि शोभनमार्गदर्शकः प्रेरणप्रदः उत्साहवर्धकश्च स्यादिति च कामये ॥

अस्मिन् कैङ्कर्ये कथञ्चित् दासमपि समायोजितवतां श्रीमदहोबिलमठश्रीकार्यधूर्वहाणाम् अस्मत्प्रियसुहृदां विदुषां श्रीमतां तेवनार्विलाहाभिजनानां डॉ. पद्मनाभाचार्याणां च सप्रणामं कार्तज्ञ्यं निवेद्य विरमामि ॥

वाचिकदोषः क्षन्तव्यः ।

शोकहर्तृपुराभिजनः रामानुजदासः

श्रीमदहोबिलमठास्थानविद्वान्

(बेंगलूरु 17.4.2017)